भूष्णुः, त्रि, (भू+ग्स्नु ।) भवनशीलः । तत्पर्य्यायः । भविष्णुः २ भविता ३ । इत्यमरः । ३ । १ । २९ ॥ साधुभवनशीलः । इति तट्टीकायां रायमुकुटः ॥ (यथा, मनौ । ४ । १३५ ।
"क्षत्त्रियं चैव सर्पं च ब्राह्मणञ्च बहुश्रुतम् ।
नावमन्येत वै भूष्णुः कृशानपि कदाचन ॥"
"भूष्णुः, धनायुरादिना वर्द्धनशीलः ।" इति तट्टीकायां कुल्लूकभट्टः ॥)

भूसुतः, पुं, (भुवः पृथिव्याः सुतः ।) मङ्गलग्रहः । इति शब्दमाला ॥ (यथा, सूर्य्यसिद्धान्ते । २ । ५५ ।
"महत्त्वाच्छीघ्रपरिधेः सप्तमे भृगुभूसुतौ ॥")
सीतायाम् स्त्री ॥

भूस्तृणं, क्ली, (भूलग्नं तृणं भुवस्तृणमिति वा । पारस्करादित्वात् सुट् ।) भूतृणम् । इत्यमरः । २ । ५ । १६७ ॥ (यथा, मनौ । ६ । १४ ॥
"वर्जयेन्मधुमांसञ्च भौमानि कवकानि च ।
भूस्तृणं शिग्रुकञ्चैव श्लेष्मातकफलानि च ॥")
अस्य पर्य्यायगुणा यथा,—
"गुह्यबीजञ्च भूतीकं सुगन्धं गोमयप्रियम् ।
भूस्तृणन्तु भवेच्छत्रा मालातृणकमित्यपि ॥
भूस्तृणं कटुकं तिक्तं तीक्ष्णोष्णं रोचनं लघु ।
विदाहि दीपनं रूक्षमनेत्र्यं मुखशोधनम् ।
अवृष्यं बहुविट्कञ्च पित्तरक्तप्रदूषणम् ॥"
इति भावप्रकाशः ॥

भूस्पृक्, [श्] पुं, (भुवं स्पृशतीति स्पृश्+क्विन् ।) मनुष्यः । इति हेमचन्द्रः । ३ । १ ॥

भूस्वर्गः, पुं, (भुवि स्वर्ग इव अमरलोकधारणात् ।) सुमेरुपर्व्वतः । इति जटाधरः ॥

भृञ, भृ लि टु डु ञ } भृतिपुष्ट्योः । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-अनिट् । लि-ह्वा०-उभ०-सक०-अनिट् ।) भृतिर्भरणं पुष्टिः पोषणम् । लि ञ "बिभर्त्ति शशिनं शम्भुर्बिभृते जनकः सुतम् । टु भरथुः । डु भृत्रिमम् । भ्वादिपक्षे भृतिः पूरणम् । ञ भरति कुम्भमद्भिर्जनः । भरते । इति दुर्गादासः ॥

भ्रूकुंशः, पुं, (कुसि+अच् । कुंसे भावदीपनम् । पृषोदरादित्वात् सस्य शत्वम् । भ्रुवा कुंशो भावप्रकाश इङ्गितज्ञापनं यस्य । निपातनात् सम्प्रसारणम् ।) भ्रुकुंशः । स्त्रीवेशधारी नटपुरुषः । इत्यमरटीकायां रमानाथः ॥

भ्रूकुंसः, पुं, (चुरादौ पट पुटेत्यादि दण्डकोक्तः कुसिर्भाषार्थः । स्त्रीवेशं धारयित्वा भ्रुवः कुंसयति पुरुषत्वमिति संज्ञात्वादुकारस्य अकारः ह्रस्वश्च वा । कुसि+अच् । यद्वा भ्रुवा कुंस इङ्गितप्रकाशो यस्य । निपातनात् सम्प्रसारणम् ।) भ्रुकुंशः । स्त्रीवेशधारी नटपुरुषः । इत्यमरटीकायां रमानाथः ॥

भ्रूकुंसकः, पुं, (भ्रूकुंस एवेति स्वार्थे कन् ।) भ्रुकुंशः । इति शब्दरत्नावली ॥

भृकुटिः, स्त्री, (कुट कौटिल्ये इति कुट+इन् । भ्रुवः कुटिः कौटिल्यं निपातनात् वा सम्प्रसारणम् ।) भ्रूकुटिः । यथा,—
"रचितभृकुटिबन्धं नन्दिना द्वारि रुद्धे ।"
इति भरतधृतहरविलासः ॥

भृकुटी, स्त्री, (भृकुटि । कृदिकारादिति ङीष् ।) भ्रूकुटिः । इत्यमरटीकायां भरतः ॥ भृकुटीकुटिलाननौ । इति मार्कण्डेयपुराणे देवीमाहात्म्यञ्च ॥

भृगुः, पुं, (तपसा भृज्जति पञ्चतपादिभिर्वेति । भ्रस्ज+"प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च ।" उणा० १ । २९ । इति कुः सम्प्रसारणं सलोपः, न्यङ्क्वादित्वात् कुत्वञ्च । यद्वा भृज्जतीति क्विप् । भृक् ज्वाला तया सहोत्पन्न इति उः ।) मुनिविशेषः । स तु ब्रह्मणस्त्वचो जातः । (यथास्योत्पत्तिर्नामनिरुक्तिश्च महाभारते । १३ । ८५ । १०५—१०६ ।
"पुरुषा वपुषा युक्ताः स्वैः स्वैः प्रसवजैर्गुणैः ।
भृगित्येव भृगुः पूर्व्वमङ्गरेभ्योऽङ्गिराभवत् ॥
अङ्गारसंश्रयाच्चैव कविरित्यपरोऽभवत् ।
सह ज्वालाभिरुत्पन्नो भृगुस्तस्माद् भृगुः स्मृतः ॥")
अस्य भार्य्या कर्द्दममुनिकन्या ख्यातिः । पुत्त्रः धाता विधाता च । कन्या श्रीः । इति श्रीभागवतम् ॥ अपि च ।
मुनय ऊचुः ।
"कथितस्ते यदा सर्गः पृष्टः सूत त्वयाधुना ।
भृगुसर्गात् प्रभृत्येष सर्गो नः कथ्यतां पुनः ॥"
सूत उवाच ।
भृगोः ख्यात्यां समुत्पन्ना श्रीः पूर्व्वमुदधेः पुनः ।
तथा धाता विधाता च तस्यां जातौ भृगोः सुतौ ॥
आयतिर्नियतिश्चैव मेरुकन्ये महाप्रभोः ।
धातुर्विधातुस्ते भार्य्ये तयोर्जातौ सुतावुभौ ॥
प्राणश्चैव मृकण्डुश्च मार्कण्डेयो मृकण्डुतः ।
ततो वेदशिरा जज्ञे प्राणस्य द्युतिमान् सुतः ॥
ततो वंशो मुनिश्रेष्ठा विस्तरं भार्गवो गतः ।
इत्याद्ये वह्निपुराणे वरसर्गनामाध्यायः ॥*॥
शिवः । शुक्रग्रहः । इति मेदिनी । गे, १५ ॥ सानुः । यमदग्निः । इति हेमचन्द्रः ॥ अरण्यकण्टकव्याप्तगिरिपार्श्वोच्चदेशः । निरवलम्बनपर्व्वतादिपार्श्वः । आरड़ि इति ख्यातम् । यस्मात् पतने अवस्थानक्रियाविशेषो नास्ति । अतएव भृगुपतनमित्यादिप्रयोगो दृश्यते । इति भरतः ॥ तत्पर्य्यायः । प्रपातः २ अतटः ३ । इत्यमरः ।२।३।४॥ दरट् ४ । इति जटाधरः ॥ पतनस्थानम् ५ । इति शब्दरत्नावली ॥

भृगुपतिः, पुं, (भृगूनां तद्वंशीयानां पतिः ।) परशुरामः । इति शब्दरत्नावली ॥ (यथा, गीतगोविन्दे । १ । १० ।
"केशवधृतभृगुपतिरूप ! जय जगदीश ! हरे ! ॥
तथा च मेघदूते । १ । ५९ ।
"हंसद्वारं भृगुपतियशो वर्त्म यत् क्रौञ्चरन्ध्रम् ।")

भृगुसुतः, पुं, (भृगोः सुतः ।) शुक्रः । इति शब्दरत्नावली ॥ परशुरामश्च ॥

भृगुलापतिः, पुं, परशुरामः । इति शब्दरत्नावली ॥ भृगूणाम्पतिरित्यपि पाठः ॥

भृङ्गं, क्ली, (बिभर्त्तीति । डु-भृञ् भरणे । "भृञः कित् नुट् च ।" उणा० १ । १२४ । इति गन् । स च कित् नुडागमश्च ।) त्वचम् । गुड़त्वक् इति ख्यातम् । इत्यमरः । २ । ५ । १६ ॥ (यथा,—
"त्वक्पत्रञ्च वराङ्गं स्याद्भृङ्गञ्चोचन्तथोत्कटम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
अभ्रकम् । इति राजनिर्घण्टः ॥

भृङ्गः, पुं, (बिभर्त्त्यनुरागमिति । भृञ्+"भृञः कित् नुट् च ।" उणा० १ । १२४ । इति गन् । स च कित् नुट् च ।) भ्रमरः । कलिङ्गपक्षी । इत्यमरः । २ । ५ । १६ । फिङ्गा इति भाषा ॥ (अस्य पर्य्याया धूम्याटशब्दे द्रष्टव्याः ।) अस्य मांसगुणाः । मधुरत्वम् । स्निग्धत्वम् । कफशुक्रविवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ षिड़्गः । भृङ्गराजः । इति मेदिनी गे, १५ ॥ (यथास्य पर्य्यायः ।
"भृङ्गराजः केशराजो भृङ्गः पतङ्ग मार्कवम्
इति वैद्यकरत्नमालायाम् ॥
तथा च पर्य्यायान्तरम् ।
"भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एव च ।
अङ्गारकः केशराजो भृङ्गारः केशरञ्जनः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
भृङ्गारः । भृङ्गरोलः । इति शब्दरत्नावली ॥

भृङ्गकः, पुं, (भृङ्ग । संज्ञायां कन् ।) राजवासनपक्षी । यथा,—
"अथ भृङ्गो भृङ्गराजो भृङ्गको राजवासनः ॥"
इति शब्दरत्नावली ॥

भृङ्गजं, क्ली, (भृङ्ग इव जायत इति । जन+डः ।) अगुरु । इति रत्नमाला ॥ (गुणाश्चास्यागुरुशब्दे विहिताः ॥)

भृङ्गजा, स्त्री, (भृङ्गज+स्त्रियां टाप् ।) भार्गी । इति राजनिर्घण्टः ॥

भृङ्गपर्णिका, स्त्री, (भृङ्ग इव कार्ष्णात् भृङ्गवर्णं पर्णमस्याः इति ङीष् । ततः स्वार्थे कन् टाप् । अत इत्वञ्च । ईकारस्य ह्रस्वत्वम् ।) सूक्ष्मैला । इति शब्दचन्द्रिका ॥

भृङ्गप्रिया, स्त्री, (भृङ्गाणां प्रिया । प्रचुरमधुत्वात् ।) माधवीलता । इति राजनिर्घण्टः ॥

भृङ्गमूलिका, स्त्री, (भृङ्गस्य भृङ्गराजस्येव मूलमस्याः कः । अजातिवचनत्वात् टाप् । कापि अत इत्वञ्च ।) भ्रमरच्छल्ली । इति राजनिर्घण्टः ॥